This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित स्रोत केंद्र, रामटेक

शीर्षक	:—	शीघ्रबोध ज्योतिष M14
ग्रंथकार /लिपिक	:—	काशीनाथ पाठक (लिपीक)
पृष्ठे	:—	34
काळ	:—	शके 1778
विषय	:—	ज्योतिष्य
स्वरुप	:—	संपूर्ण
लिपी	:—	देवनागरी/नंदिनागरी/मोडी/तेलुगु/शारदा/नेवारी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ शीघ्रबोधज्योतिष्यग्रंथ लि॥
॥ ख्यते प्रारंभः॥ पत्र॥ ३८॥ श्रीगुरु॥
॥ दानाम् थपेर्णमस्तु॥ श्रीरामजय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ श्रीगणेशायनमः॥ भासयंतंजगद्भासा नत्वाभास्वतमव्ययं॥ क्रियते का
शीनाथेन शीघ्रबोधाय संग्रहः॥१॥ रोहिण्युत्तररेवसोमूलं स्वातिमृगो
मघा॥ अनुराधातहस्ताश्च विवाहे मंगलप्रदाः॥२॥ इति विवाहनक्षत्रा
णि॥ माघे धनवति कन्या फाल्गुणे शुभकारिका भवेत्॥ वैशाखे च तथा ज्येष्ठे
पकृत्स्यं तव शुभा॥३॥ आषाढे कुलवृद्धिः स्यादन्यमासाश्च वर्जिता॥ मा
र्गशीर्षमपि छंति विवाहे कोपकोविदाः॥४॥ इति विवाहमासानि॥ अमा ॥१॥
वास्याच रिक्ताच वारवेलाच जन्मभं॥ गंडांतक्रूरवाराश्च वर्जनीयाः प्र
यत्नतः॥५॥ नंदाभद्राजयारिक्तापूर्णाश्च तिथयः क्रमात्॥ वारत्रयं स
मावृत्य तिथयः प्रतिपन्मुखाः॥६॥ सूर्ये अर्के सप्तमे चंद्रे द्वितीया भूमिनंद
ने॥ चंद्रपुत्रे पंचमश्च देवाचार्ये तथाष्टमे॥७॥ दैत्यपूज्ये तृतीयश्च शनौ
षष्ठश्च निंदितः॥ प्रहरार्द्धं शुभे कार्ये वारवेला निकथ्यते॥८॥ इति वार

यो॥ अवर्गो गरुडो ज्ञेयो बिडालः स्यात्कवर्गकः॥ चवर्गः सिंहनामस्यात्
टवर्गः कुक्कुरः स्मृतः॥१७॥ सर्पाख्यः स्यात्तवर्गोपि पवर्गो मूषकोमतः॥
यवर्गो मृगनामस्यात्तथा मेषः शवर्गकः॥१८॥ स्ववर्गे परमा प्रीतिर्मि
त्रे प्रीतिश्च कथ्यते॥ उदासीने प्रीतिरल्पा शत्रुवर्गो मृतिर्भवेत्॥१९॥ स्व
वर्गात्पंचमे शत्रु चतुर्थे मित्रसंज्ञकः॥ तृतीये चानुदासीने वर्गभेद विदो
॥२॥ च्यते॥ योजस्य पंचमस्थाने तस्यैवैरं न संशयः॥ वैरं मूषकमार्जारं त ॥२॥
द्वैरं मृगसिंहयोः॥ वैरं गरुडसर्पश्च तद्वैरं श्वानमेषयोः॥२०॥ इति वर्ग
प्रीति॥ अश्विनि मृगरेवसो हस्तपुष्योपुनर्वसुः॥ अनुराधाश्रुतिस्वा
ती कथ्यते देवतागणाः॥२१॥ तिस्रःपूर्वाउत्तराश्च तिस्रोप्याद्राश्च रोहि
णि॥ भरणीच मनुष्याख्यो गणश्चोक्थितोबुधैः॥२२॥ कृत्तिका च मघा
श्लेषा विशाखा शततारका॥ चित्राज्येष्ठा धनिष्ठा च मूलं रक्षोगणस्मृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेला॥ भद्राकर्कटयोगं च तिथ्यंत यमघंटकं॥ दग्धा तिथिं च भातं च कुल
कं च विवर्जयेत्॥ ७॥ दशम्यां च तृतीयायां कृष्णपक्षे परे दले॥ सप्तम्यां
च चतुर्दश्यां विष्टिः पूर्वदले स्मृताः॥ १०॥ एकादश्यां चतुर्थ्यां च शुक्ल
पक्षे परे दले॥ अष्टम्यां पूर्णिमायां च विष्टिः पूर्वदले स्मृताः॥ ११॥ इति भ
द्राज्ञानं॥ मीने चापे द्वितीया च चतुर्थी वृषकुंभयोः॥ मेषकर्कटयोः षष्ठी
कंन्या मिथुने चाष्टमी॥ १२॥ दशमी वृश्चिके सिंहे द्वादशी मकरे तुले॥
एताश्च तिथयो दग्धाः शुभे कर्मणि वर्जिता॥ १३॥ इति दग्धा॥ मासांते
स्यते कंन्या॥ तिथ्यंते स्यात् पुत्रिणी॥ नक्षत्रांते च वैधव्यं विषेऽपस्या
द्वयोस्थि॥ १४॥ सूर्ये च सप्तमी सोमे षष्टभौमे च पंचमी॥ बुधे चतुर्थी
दैवेज्ये तृतीया भृगुनंदने॥ १५॥ द्वितीया च जे नीया च प्रतिपञ्च शनैने
श्चरे॥ कुलकाख्यो हि योगोयं विवाहादौ न सस्यते॥ १६॥ इति कुलकं

तः॥ २४॥ स्वगणे परमा प्रीतिः मध्यमा देवमर्त्ययोः॥ मर्त्यराक्षसयो
र्मृत्युः कलहो देवराक्षसा॥ २५॥ इति गणफलं॥ षष्ठ्ये स्त्रीपुंसयोर्वै
रं मृत्युः स्याद् अष्टमे ध्रुवं॥ द्विद्वादशो च दारिद्र्यं नवमे पंचमे कलिः॥ २५॥
मकरकन्या मेषजुवसा तुलसह मीनकुलीरघटाया॥ वृषधनुवृ
श्चिकमन्मथ गामी एते षडष्टक स्वामी॥ २६॥ इति षडाष्टकं॥ मी
नालिकर्कटा विप्राः क्षत्री मेषो हरिर्धनुः॥ शूद्रा युग्मं तुला कुंभौ वैश्यकं
न्या वृषो मृगः॥ २७॥ नोत्तमामुद्वहेत् कंन्या ब्राह्मणी च विनाशयेत्॥ म्रियं
ते हीनवर्णश्च ब्राह्मणा सद्विशो यदि॥ २८॥ इति वर्णप्रीतिः॥ पोषादि
के षट्कं मुनीति पूर्वा मार्द्रादिकं द्वादश मध्यभागं॥ पोरंदराद्यं नव कं च
कं पंच भागं गणका विदग्धा॥ २९॥ पूर्वभागे पतिश्रेष्ठाः मध्यभागे
च कन्यका॥ परभागे च नक्षत्रद्वया प्रीतिर्महीयसि॥ ३०॥ सिंहं विना व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामर्वैद्विपदानांचतुष्पदा॥भूलाजलचरस्तेषांभयस्थानेसरीसृपाः॥
॥३१॥ तुलाचमिथुनंकन्यापूर्वार्द्धंधनुषश्चते॥ द्विपदासाचपश्चार्द्धं
मकरस्यतथापुनः॥३२॥ कुंभमीनोजलचारौराशाव्यश्चप्रकीर्तिताः॥
मकरस्यपूर्वभागोमेषः सिंहोधनुर्वृष॥३३॥ चतुष्पदाःकीटसंज्ञोवृर्कः
॥३॥ सर्पश्चवृश्चिकः॥३४॥ इतिवैश्यप्रीति॥ अश्विनीवारुणीचाश्वौरेवती ॥३॥
भरणीगजः॥पुष्यश्चकृत्तिकाछागोनागश्चरोहिणीमृगः॥३५॥ आ
र्द्रामूलमपिश्वानेमूषकोफाल्गुणीमघा॥ मार्जारोदितिरश्लेषागोजाति
रुत्तरात्रयं॥३६॥ महिषोस्वातिहस्तौचमृगोज्येष्ठानुराधिकौ॥ व्याघ्र
श्चित्राविशाखाचश्रुत्तापाढवमर्कटौ॥३७॥ सर्तभद्रपदासिंहोनकु
लश्चाभिजित्स्मृतः॥ योनयोकथितास्मानांवैरंमैत्रीविचार्यतां॥३८॥ गो
व्याघ्रंगजसिंह[illegible]मश्वमहिषंश्वानंचबभ्रूरगंवैरंवानरमेषकंचस

घ

महत्सद्विडालौंदुर। लोकानांव्यवहार[illegible]तोन्यदपिचज्ञात्वाप्रय
त्नाद्दिदंदंपत्योरनुपश्यस्ययोरपिसदावर्यंगुरुस्पर्द्धयोः॥३९॥ इतिया
निप्रीति॥ मारणेपितृमात्रोचसंग्राह्यौनवपंचमौ॥ वरस्यपंचमेकन्याक
न्यायानवमेवरः॥३९॥ एतत्त्रिकोणकेग्राह्यंपुत्रपौत्रसुखावहं॥ षडा
ष्टकेभवेन्मृत्युःयत्नस्तत्रद्विवारयेत्॥४०॥ इतिराशिमेलनं॥ वरस्य
भास्करबलंकन्यायाश्चगुरोर्बलं॥ द्वयोश्चंद्रबलंग्राह्यंविवाहोनान्य
थाभवेत्॥४०॥ अष्टमेचचतुर्थेचद्वादशेचदिवाकरे॥ विवाहितानरो
मृत्युःप्राप्नोयत्रनसंशयः॥४१॥ जन्मन्यत्रद्वितीयेचपंचमेसप्तमेपि
वा॥ नवमेचदिवानाथेपूजयापाणिपीडने॥४३॥ एकादशेतृतीयेच
षष्टेवादशमेपिवा॥ वरस्यसुभदोनित्यंविवाहेदिननायकः॥४४॥
इतिरविबलं॥ अष्टमेद्वादशेचापिचतुर्थेवाबृहस्पतौ॥ पूजातत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकुर्याद्विवाहे प्राणनाशकः ॥ ४४ ॥ षष्ठे जन्मनि देवेज्ये तृतीये दशमे
पिवा ॥ भृगिपूजापूजितस्यात्कन्यायाः कथितः शुभः ॥ ४५ ॥ एकादशे द्विती
ये च पंचमे सप्तमे पिवा ॥ नवमे च सुरश्रेष्ठः कन्यायाः कथितः शुभः ॥ ४६ ॥
इति गुरुबलं ॥ आद्ये चंद्रः श्रियं कुर्यात् मतसौख्यं द्वितीयके ॥ तृतीये ध
नसंपत्तिः चतुर्थे कलहागमः ॥ ४७ ॥ पंचमे ज्ञानवृद्धिश्च षष्ठे संपत्तिरुत्त
माः ॥ सप्तमे राजसन्मानं मरणं चाष्टमे तथा ॥ ४८ ॥ नवमे धर्मलाभं च
दशमे मानसेप्सितं ॥ एकादशे सर्वलाभं द्वादशे हानिमेव च ॥ ४९ ॥ इति
चंद्रबलं ॥ गौरी गुरुबले देया रोहिणी भास्करस्य च ॥ कन्या चंद्रबले ज्ञेयं
सप्तदोषविवर्जिता ॥ ५० ॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ॥ दशवा
र्षा भवेत्कन्या तत ऊर्ध्वं रजस्वला ॥ ५१ ॥ द्वादशे द्वादशे वर्षे यस्याः शुद्धि
र्न जायते ॥ पूजाभिः शालकैर्वापि तस्याः लग्नं प्रदापयेत् ॥ ५२ ॥ पंचांगस्था

बोध

पयेद्रेषा पंचतिर्यङ्मुखास्तथा ॥ ऊर्ध्वश्च कोणयोर्द्वे च चक्रं पंचशलाककं ॥
५३ ॥ ईशाने कृत्तिकां दद्यात्क्रमाद्धिष्ण्यानि भानि च ॥ ग्रहास्तेषु प्रदातव्या यत्र च
यत्र प्रतिष्ठिता ॥ ५४ ॥ लत्तापातो युतिर्वेधो यामित्रं बुधपंचकं ॥ नवग्रहोश्चै
कार्गलं कांतिसाम्यं तथापरं ॥ ५५ ॥ दग्धा तिथिश्च विज्ञेया दश दोषा महाब
ला ॥ एतान्दोषान्परित्यज्य लग्नं संशोधयेद्बुधः ॥ ५६ ॥ नक्षत्रं द्वादशं ११ भा
नुः तृतीयं लत्तया कुजः ॥ षष्ठं जीवो ह्यष्टमं मंदः ८ हंति दक्षिणतः सदा ॥ ५७ ॥
वामेन सप्तमं चांद्रिर्नवमं सिंहिकासुतः ॥ हंति भं पंचमोऽसुक्रो द्वाविंशो २२
पूर्णचंद्रमा ॥ ५८ ॥ रवेर्लत्ता हरेद्वित्तं कुजस्य कुरुते मृतिं ॥ बृहस्पतिर्बंधुना
शं शनौ कुर्यात्कुलक्षयं ॥ ५९ ॥ बुधस्य कुरुते त्रासं लत्ता राहोर्विनाशयेत् ॥
शुक्रस्य दुःखदा नित्यं त्रासदा च कलानिधे ॥ ६० ॥ इति लत्तादोषज्ञानं ॥ सू
र्ययुक्ता च नक्षत्रा दोषपातो भिजायते ॥ मघाश्लेषा च चित्रा च सानुराधा च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेवती ॥६१॥ श्रवणेपिच षड्भायं पातध्रक्षे निगद्यते ॥ अश्विनीमविधिंकृत्वा
गणयेल्लग्नभावधि ॥६२॥ पावकः पव[redacted]मानश्च विकारीकलहोपरः ॥ म
रुहस्यश्च विज्ञेयं पातश्चषट्लक्षणं ॥६३॥ पातेन पतितो ब्रह्मा पातेन प
तितो हरिः ॥ पातेन पतितो शंभुस्तस्मात्पातो विवर्जयेत् ॥६४॥ साध्य हर्षण
शूलानां वैधृतिव्यतिपातयोः ॥ गंडयोग समुत्पन्ने तस्यांते च विधीयते ॥६५॥
॥५॥ इति पातज्ञानं ॥ एकरेखास्थितो वेधो दिननाथादिभिर्ग्रहैः ॥ विवाहस्तत्रमा ॥५॥
सेतु न जीवति कदाचन ॥६६॥ अश्विनीपूर्वाफाल्गुन्यां भरणीचानुराध
या ॥ अभिजिच्चापि रोहिण्यां कृत्तिका च विशाखयोः ॥६६॥ मृगश्चोत्तराषा
ढेन पूर्वाषाढा तथार्द्रयो ॥ पुनर्वसुश्च मूलेन तथा पुष्यश्च ज्येष्ठयोः ॥६७॥
धनिष्ठा च तथाश्लेषा मघापि श्रवणेन च ॥ रेवत्युत्तरफाल्गुन्योर्हस्तोत्त
रभाद्रपात् ॥६८॥ विद्धान्येकाविवर्जो[redacted]णि विवाहभानिकोविदैः ॥६९॥

तोघ्र

रविवेधे च वैधव्यं कुजवेधे कुलक्षयं ॥ बुधवेधे भवेद्वंध्या प्रव्रज्या गुरुवेधतः
॥७०॥ अपुत्रा शुक्रवेधे च सौरेवेधे च दुःखदा ॥ परपुरुषरता राहो केतोः स्व
च्छंद[redacted]चारिणी ॥७१॥ इति वेधज्ञानयंत्रः ॥ यत्र गेहे भवेच्चंद्रो ग्रहास्त
त्र यदा भवेत् ॥ युतिदोषस्तदा ज्ञेया विना शुक्रशुभाशुभं ॥७२॥ रविणा संवि
त्तो हानिः भौमेन निधनं ध्रुवं ॥ करोति मूलनाशं च राहुकेतुश्च नैश्वरो ॥
॥७३॥ इति युतिदोषज्ञानं ॥ चतुर्दशांच नक्षत्रे यामित्रे लग्नभास्करं ॥ शु
भयुक्ते तदिष्टं तिपापयुक्ते च वर्जयेत् ॥७४॥ चंद्रश्चांद्रि शुक्रजीवा यामि
त्रशुभकारकः ॥ स्वर्भानुर्भानुमंदारा यामित्रेणशुभप्रदा ॥७५॥ चंद्रहो
लग्नतो वापि ग्रहो वर्ये च सप्तमे ॥ यत्रस्थितो ग्रहान्नूनं व्याधिवैधव्य
कारकं ॥७६॥ इति यामित्रं ॥ चार्यातिथि १५ मास १२ दक्षा १० ए ८ वेदा ४
संक्रांतितो यातिदिनैश्च योज्या ग्रहैः विभक्ताय दिपंचकं स्यात् रोगस्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थाग्निनृपचौरमृत्यु ॥ ७७ ॥ यद्यर्कवारे किल रोगपंचकं सोम्ये तु राज्ये क्षि
तिजे च वन्हिः ॥ शनौ च मृत्युः सुरमंत्रिचौरो विवाहकाले परिवर्जनीयाः
॥ ७८ ॥ गतदिन १७८ अदरोगकारणि २६ छबीसहां ३ उणा रहा १९ उगणी
तीस २७ वन्हिदोषांलरबीसहा ॥ नेरहा बासमनृपति विहु ६ बिधिजाणी ॥ ९ ॥
जउ ॥ षट ६ पनरहा चउवीस दोरकारणटालीजउ ॥ दस उगणीसा मृत्यु
भय ॥ अठावीसहमतिकरउ ॥ एताबुधपंचकजानिनउ ॥ टालिदोषकेन्या
बरउ ॥ ७९ ॥ इति बुधपंचकं ॥ सूर्यभात्सप्तमेविधून्नक्षत्रे शूलमष्टमे ॥ चतु
र्दशे चाग्निपाते केतुरष्टादशे तथा ॥ ८० ॥ एकोनविंशो भवेदुल्का निर्घातश्च
विविंशतौ ॥ त्रयोविंशतिके कंपश्चतुर्विंशे च वज्रकं ॥ ८१ ॥ पुत्रनाशकरी वि
द्युत्सूर्यः शूलविनाशकः ॥ शनिपातो वंशघाती केतुर्देवरनाशकः ॥ ८२ ॥
द्रव्यनाशकरी चोल्का निर्घातो वंशघातकः ॥ कंपः कंपयते निसं वज्रे स्त्री

व्यभिचारिणी ॥ ८३ ॥ इति उग्रहज्ञाने ॥ योगार्को विषमे चैकोसमे चवव
मूलभे ॥ २८ ॥ श्रद्धाहस्ताश्विनी पूर्वा मंकभं मूर्द्धिदीयते ॥ ८४ ॥ विष्कुंभे
चाश्विनी दया प्रीतौ स्वाति निगद्यते ॥ सौभाग्ये च विशाखास्यादायुष्मान्
भरणीयुतः ॥ ८५ ॥ शोभने कृत्तिका देयानुराधा चातिगंडके ॥ रोहिणी
वसुकर्मा ख्याधृतौ ज्येष्ठाप्रकीर्तिता ॥ ८६ ॥ गंडे मूले मृगः शूले वृद्धौ चा
र्द्रा निगद्यते ॥ पूर्वाषाढा ध्रुवे प्रोक्ता व्याघाते च पुनर्वसुः ॥ ८७ ॥ हर्षणे चोत्त
राषाढा वज्रे पुष्य प्रकीर्तिता ॥ अभिजिच्च तथा सिद्धौ चाश्लेषा च व्यति
पातके ॥ ८८ ॥ वरीयांश्च श्रुतिर्ज्ञेया परिघे च मघा तथा ॥ शिवे धनिष्टा दात
व्या सिद्धौ पूर्वा च फाल्गुनी ॥ ८९ ॥ साध्ये शतभिषा देया शुभे चोत्तरफा
ल्गुनी ॥ पूर्वाभाद्रपदा शुक्ले हस्तब्रह्माणी कीर्तितः ॥ ९० ॥ उत्तराभाद्रप
दाचैंद्रे चित्रा देया च वैधृतौ ॥ चैंद्रे सूर्य मसा योग भवेदेकार्गलं तथा ॥ ९१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनकूरहिमरश्मोदृष्टिसंपातजन्माभवतिविकलमूर्त्तिः कोपिरुद्रोमनु
ष्यः पततिभवनमध्येमंगलानां विनिष्टः ज्वलकपिलदृष्टानिर्दहन्नेवजं
गंति ७२ त्रयोदशातिरोरेषा एकोद्वौमस्तकेत [illegible]तः योगांकेप्रास्तन
क्षत्रेयामकार्गलंबुधैः ७३ इतियकार्गलं ऊर्ध्वास्तिसप्त अधोस्ति
सः मध्येमीनेलिखेद्बुधः सप्तचंद्रमसोदृष्टोक्रांतिसाम्यंनिगद्यते
॥८॥ ७४ मीनकन्यकयोरेकोमेषसिंहेनसंयुतः मकरेण वृषक्रांतिसाम्यो ॥८॥
पिमिथुनेनच ७५ कर्केणवृश्चिकोवधोवधश्चतुलकुंभयोः नास्तिह
तोअग्निदग्धोनागदृष्टोपिजीवति ७६ क्रांतिसाम्येकृतोद्वाहेनजीव
तिकदाचनः इतिक्रांतिसाम्यं मर्म[illegible]वेधः कंटकेचतुल्यंछिद्रंचतु
र्थकं एतदोषचतुष्कंचपरित्याज्यप्रयत्नतः ७८ लग्नपापमर्मवेधः
कंटकोनचपंचमे चतुर्थेदशमेतुल्यंविद्रंभवतिसप्तमे ७७ मरणंम

॥८॥

मेवेधस्यात्कंटकेचकुलक्षयं तुल्येचनृपतिर्भीतिः पुत्रनाशश्चछिद्रके
१०० इतिमर्मवेधकंटकवेधतुल्यछिद्रदोष मासांतेदिनमेकंतुति
थ्यंतेघटिकाद्वयं घटिकात्रितीयंभांतेविवाहेपरिवर्जयेत् १ जन्ममासे
जन्मभेचनचजन्मदिनेबुधः ज्येष्टमासेनज्येष्टस्यविवाहंकारयेत्क्व
चित् द्वयोरेकतरेज्येष्टेनज्येष्टोदोषमावहेत् नकन्यावरयोज्येष्टेज्ये
ष्टयोः पाणिपीडनं २ सिंहेगुरौगतेकार्यानविवाहंकदाचनः मेषस्था
पिदिवानाथो सिंहस्थोपिशुभः प्रदः ३ रवौसार्द्धत्रयोभागाःपंच
चंद्रेगुरुस्त्रयं द्वौशुक्रेद्वौचंद्रपुत्रेभागंविश्वाप्रदाअमी ४ प्रत्येकेसार्द्ध
भागंचमंदमंगलराहुषु ग्रहाबलयुताविश्वाप्रयछंतिनदुर्बल ५
इतिविश्वा केंद्रेसप्तमहीनेचद्वित्रिकोणशुभाशुभं धनेशुभःस्त्वद्
चंद्रः पापषष्टेचशोभनः ६ त्रितीयकादशौसर्वसौम्याःपापाःशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ८ ॥

भग्रदा ॥ तेच सर्वे सप्तमस्थास्सदा वरकन्ययोः ॥ ७ ॥ शनिसूर्यश्च लग्नस्थस्ते
चंद्रो लग्नेष्टमे रिपौ ॥ कुजो लग्नेष्टमे चास्ते शुक्रो घूनेष्टमे रिपौ ॥ ८ ॥ गुरुस्त
यो सिंहके यो लग्ने तृतीये च सप्तमे ॥ बुधेष्टमे च या मित्र विवाहे प्राणनाशकः ॥
९ ॥ क्रूरयोरंतरे लग्ने चंद्रे च परिवर्जयेत् ॥ वराह तिदुं तल लग्नं नश्रीतर भिम्
श्च कन्यकां ॥ १० ॥ इति ग्रहशुभाशुभविचारः ॥ तुला च मिथुने कन्या पूर्वार्द्धे
धनुषा वृषः ॥ एते लग्ना शुभा नित्यं मध्यमाश्चापरे स्मृताः ॥ ११ ॥ लत्ता मालव
के देशे पातं चैव कुरुजांगले ॥ एकार्गलेन काश्मीरे वाके देशे उपग्रहः ॥ युतिया
मित्र उद्याने वेध सर्वत्र वर्जयेत् ॥ १२ ॥ इति योगः ॥ मेषे नवांशाः मेषाद्याः वृषे
च मकरादिकाः ॥ मिथुने च तुलाद्याः स्युः कर्कटे कर्कटादिका ॥ १३ ॥ मेषाद्यैश्च
धनुः सिंहो गो कन्यो मकरादिको ॥ ८ ॥ तुलाच युग्म कुंभौ च कर्कौ च मीनवृश्चि
कौ ॥ १४ ॥ गो तुला युग्म कन्यानां नवांशाः शुभदाः स्मृताः ॥ धनुषः प्रथमो भा

॥ ८ ॥

बोध

गो विवाहेन्य च मध्यमा ॥ १५ ॥ अंशेशस्य पतिं रसोच्च तन्मित्रं वा शुभो पि वा ॥ प
श्येत्तदा शुभो ज्ञेया सर्वे दोषाश्च निष्फलाः ॥ १६ ॥ इति नवांशज्ञानं ॥ शुक्ला
ष्टमी समारभ्य फाल्गुणस्य दिनाष्टकं ॥ पूर्णिमामवधिं सार्द्धं होलाष्टकमनि
ष्टं शुभे ॥ १७ ॥ इति होलाष्टक ॥ दिनेंधा दांधा वृष मेष सिंहा रात्रौ च कन्या मि
थुनं कुलीर ॥ मृगस्तुलालि बधिरः परान्हे संध्या सु कुंभा घट धन्वि मानाः
॥ १८ ॥ दिवांधो वरहंता च रात्र्यंधो धन नाशकः ॥ दुःखदो बधिरो लग्ने कु
ष्ठो वंशश्च नाशकः ॥ १९ ॥ इति विवाहे लग्नं ॥ यत्रैवैकादशो चंद्रो द्वितीयो
वा तृतीयकः ॥ गोधूलिकः स विज्ञेयो नैषा धूलिमुखाः स्मृताः ॥ २० ॥ कु
लिकं क्रांतिसाम्या वा लग्ने षष्ठाष्टमे तनौ ॥ तदा गोधूलिका स्त्याज्यः पंच
दोषेण दूषिताः ॥ २१ ॥ यदा नास्तंगतो भानु गोधूल्या पुरितं नभः ॥ सर्वमं
गलकार्येषु गोधूलिः सस्यते तदा ॥ २२ ॥ अष्टमे जीव भौमे च बुधश्च भार्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाष्टमे ॥ लग्नषष्ठाष्टमे चंद्रो गोधूले नाशकृत्सदा ॥ २३ ॥ लग्नादेकादशे सर्वे
लग्नपुष्टकराः ग्रहाः ॥ तृतीये चाष्टमेः सूर्यः सूर्यपुत्रश्च शोभनः ॥ २४ ॥ चंद्रे
धने तृतीये च कुजः षष्टः तृतीयके ॥ बुधे ज्ञाने च षट् द्वित्रि चतुः पंचदशः स्थि
तो ॥ २५ ॥ शुक्रो द्वित्रिचतुः पंच धर्मे कर्मतनुस्थितः ॥ राहुः दशाष्टषट् पंच
त्रिनवद्वादशेऽशुभः ॥ २६ ॥ इति षट् ग्रहाः ॥ छायापादोरसोपेत एकविं
॥ ७ ॥ शत्यांतं भजेत् ॥ लब्धांते घटिकाज्ञेया शेषांके च पलास्मृताः ॥ २७ ॥ इति दृष्ट ॥ ७ ॥
दिनलग्नज्ञानं ॥ पूर्वाषाढानुराधा च ज्येष्ठाश्लेषा च रेवती ॥ विषा खा च यदा
मूर्ध्नि तदा स्यात्सप्तमोदयः ॥ २८ ॥ मस्तके मृगशीर्षे च मूले च नवमोदयः ॥
अन्यद्दृक्संयदा मूर्ध्नि तदा स्यादष्टमोदय ॥ २९ ॥ सूर्यभां मूलभं च गण्यं अ
ष्टहीने च शेषकं ॥ द्विगुणं च द्विहीने च गतरात्री स्फुटा भवेत् ॥ ३० ॥ इति रा
त्रिलग्नज्ञानं ॥ किंकुर्वंति ग्रहाः सर्वे यस्य केंद्रे बृहस्पतिः ॥ मत्तमातंगयूथा

बोध

नां शतं हंति च केसरी ॥ ३१ ॥ शुक्रो दशसहस्राणि बुधो दशशतानि च ॥ लक्षमे
कं तु दोषाणां गुरुर्लग्ने व्यपोहति ॥ ३२ ॥ सर्पाकारं लिखेच्चक्रं विवाहे च त्रिना
डिकं ॥ अश्विनी प्रमुखं भं च दत्त्वा साम्यं विचारयेत् ॥ ३३ ॥ एकनाडिस्थनक्ष
त्रे दंपत्योर्मरणं ध्रुवं ॥ सेवायां च भकेंद्रानि विवाहे त्वशुभं भवेत् ॥ ३४ ॥ इति प
ञ्चचक्रं ॥ परिघार्द्धं व्यतीपाते वैधृते सकलं त्यजेत् ॥ विष्कुंभे घटिकापंच
शूले सप्तप्रकीर्तिता ॥ ३५ ॥ षट् गंडे चातिगंडे च नव व्याघात वज्रयो ॥ व्यती
पाते भवेन्मृत्युः गंडांते मरणं ध्रुवं ॥ ३६ ॥ वह्निदग्धो भवेद्गात्रो ऋणं चैव तु
शूलयोः ॥ वैधव्यं वैधृतिः कुर्याद्विष्कुंभे कामचारिणी ॥ ३७ ॥ वीर्यहीनाति
गंडे तु व्याघाते मृतवत्सका ॥ परिघे च भवेद्दासी मद्यमांसरतासदा ॥ ३८ ॥
एते तु नवयोगाश्च वर्ज्यो लग्ने सदा बुधैः ॥ इति योगा वर्ज्यं ॥ पद्माकारं लि
खेच्चक्रं मष्टकोणसमन्वितं ॥ यस्मिन् ऋक्षे भवेत्सूर्य तदादि मध्यगं त्रयं ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयं त्रयं च सर्वत्र ततः पूर्वादितो लिखेत् ॥ नक्षत्रत्रितयं मध्ये पक्षद्वयविना
शकं ॥ ४० ॥ पूर्वस्थाने भवेल्लक्ष्मी धनधान्यसमागमः ॥ अग्निकोणे भवेन्मृ
त्युः नारीकुलविनाशनी ॥ ४१ ॥ दक्षिणे दुर्भगा नारी दरिद्रा मध्यमा सुयाल
नैरृत्ये पुत्रलाभस्युः सुखसौभाग्यमेव च ॥ ४२ ॥ पश्चिमे विधवा कन्या वा
यव्ये व्यभिचारिणी ॥ उत्तरे धनधान्यानि ऐशान्ये सुखसंपदा ॥ ४३ ॥ मांग
 ल्यसर्वकार्येषु पट्टचक्रं विचारयेत् ॥ गर्गाचार्येण सदा प्रोक्तं सर्वसिद्धिप्रदा
यकं ॥ ४४ ॥ इति पट्टचक्रं ॥ इति श्रीकाशिनाथकृतौ शीघ्रबोधे विवाहप्रक
रणं समाप्तः ॥ ५७ ॥ धात्रियुग्मं हयो मैत्रं श्रुतियुग्मं करत्रयं ॥ पुनर्वसुद्वयं पूषा
मूलं चाप्युत्तरात्रयं ॥ १ ॥ विषमो वत्सरो मासो मार्गो मीषश्च फाल्गुनः ॥ म
करो मिथुनो मीनो लग्नं कन्या तुलाधरः ॥ २ ॥ भौमार्कि वर्जिता वाराः गुरु
लेच द्विरागमे ॥ षष्ठी रिक्ता द्वादशी च अमावास्या विवर्जिता ॥ ३ ॥ इति द्विरा

गमः ॥ आर्द्रात्रयं भद्रयुग्मं मृगपूषाश्च तिष्य कः ॥ मूलं चापि गुरुसूर्यभौ
मेरिक्ता विना तिथिः ॥ ४ ॥ आद्येद्वयोत्रये मासे लग्ने कन्या वृषे स्थिरे ॥ चा
पे पुंसवनं कुर्यात्सीमंतं चाष्टमे तथा ॥ ५ ॥ इति पुंसवनसीमंतकर्ममुहूर्तः ॥
पुनर्वसुद्वये हस्तत्रये मैत्रद्वये मृगे ॥ मूलोत्तरधनिष्ठा च द्वादशैकादशो
दिने ॥ ६ ॥ अन्यत्रापि शुभे योगे वारे बुधशशांकयोः ॥ भानुगुरु स्थिरे
लग्ने बालानाम प्रकीर्तितं शुभः ॥ ७ ॥ इति बालनामकरणं ॥ मैत्रत्रये हस्तद्वये
विधिद्वये दितिद्वये ॥ स्वाति हस्तोत्तराषाढ पूर्वात्रये हयेषु च ॥ ८ ॥ सिंह
त्रये घटे लग्ने मासयोस्त्रिचतुर्थयोः ॥ यात्रातिथौ वा नः कार्यो त्रिःशुनैवा
र्कि भौमयोः ॥ ९ ॥ इति निष्क्रामनं ॥ हस्तादिपंचके [illegible]श्विन्यां धनिष्ठा पौच
रुषणं ॥ गुरौ शुक्रे बुधवारे धाराधात्री भिन्ने वा वरं ॥ १० ॥ इति नान्नवस्त्रप
रिधापने ॥ नवान्नभोजने ग्राह्यं वस्त्रप्रोक्तं मनीषतः ॥ वारे धिके सूर्ये सौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्योनक्षत्रेश्रवणोमृगः ॥ ११ ॥ इतिनवान्नभोजनं ॥ आद्यन्नप्राशनेपूर्वास
र्पोद्रावरुणायमैः ॥ नक्षत्रेषुपरित्याज्याः वारौभौमार्कनंदनौ ॥ १२ ॥ द्वादशी
सप्तमीरिक्तापर्वनंदासुवर्जिता ॥ लग्नेषुवृश्चिकोग्राह्योवृषकन्याचमन्मथः
॥ १३ ॥ शुक्लपक्षः शुभोयोगोसंग्रहः शुभचंद्रमा ॥ मासोषष्ठाष्टमौपुंसां
स्त्रीणांमसश्चवर्जिता ॥ १५ ॥ इतिप्रथमान्नप्राशनं ॥ पुनर्वसुद्वयंज्येष्ठाम्
॥११॥ गेचश्रवणद्वये ॥ हस्तत्रयेचरेवत्यांशुक्लपक्षोत्तरायणे ॥ १६ ॥ लग्नेगास्त्री ॥११॥
धनेकुंभेमकरेमन्मथेतथा ॥ सौम्यवारेशुभेयोगेचूडाकर्मेसमतंबुधै ॥
॥ १७ ॥ चूडाकर्मेणिदेयस्तजन्ममासस्तजन्मभं ॥ रिक्ताषष्टीचपर्वाणिप्र
तिपच्चतिथिष्वपि ॥ १८ ॥ इतिचूडाकर्मः ॥ हस्तत्रयेदस्त्रद्वये पूर्वाश्वेमृगपंच
के ॥ मूलेपौष्णेचनक्षत्रेबुधेर्केगुरुशुक्रयोः ॥ १९ ॥ देवस्थानेमीनचापल
ग्नवर्षेचपंचमे ॥ विद्यारंभोत्रिवर्षेश्वषष्ठानाध्यायरिक्तका ॥ २० ॥ इतिविद्या

मौघ बोध

रंभः ॥ पूर्वाषाढाश्विनीहस्तत्रयेचश्रवणत्रये ॥ ज्येष्ठामृगेभगेपुष्येरेव
त्यांचोत्तरायणे ॥ २१ ॥ द्वितीयायांतृतीयायांपंचम्यांदशमीत्रये ॥ सूर्यशुक्रज
सोमेचवारेपक्षेतथासिते ॥ २२ ॥ लग्नेवृषधनुःसिंहेकन्यामिथुनयोरपि ॥
व्रतबंधःशुभेयोगेब्रह्मक्षत्रविशांभवेत् ॥ २३ ॥ इतिव्रतबंधः ॥ कृत्तित्रये
दितिद्वंद्वेमैत्राद्दस्तत्रयोत्तरे ॥ भगविधिपुगमूलेपूषास्वसौम्यवारके ॥ २४ ॥
द्विस्वभावघटेलग्नेकर्णवेधःशुभोभवेत् ॥ चैत्रपौषाहरेस्थापवर्षेचयुग
जंत्यजेत् ॥ २५ ॥ इतिकर्णवेधः ॥ पुनर्वसुद्वयंचित्राविषाखाभरणीद्वयं ॥ मू
लमार्द्रामघाद्दयाश्रवणोदशमस्तथा ॥ २६ ॥ सोमशुक्रबुधानारीप्रसूता
स्नानकारिणी ॥ हेयाप्रतिपदाषष्टीनवमीचतिथिक्षयः ॥ २७ ॥ इतिप्रसूति
स्त्रीप्रथमस्नानं ॥ मूलंदितिद्वयंग्राह्यंश्रवणश्वमृगः करः ॥ जलवाप्यां
नेहयाशुक्रमेदार्कभूमिजाः ॥ २८ ॥ अनुराधाचतुष्कंचमघादितियुगकरे ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वातीश्रुतिविधिहृद्रेवसौम्युत्तरेषु च ॥२९॥ गोहृपोस्त्रीकृषेदालकार्यो दे

यः स्यानिकुजः ॥ षष्ठीरीक्ताद्वादशीचहुलीयाहष्पपर्वेच ॥३०॥ त्रिभिस्त्रि

भिस्त्रिभिःपंचत्रिभिःपंचत्रिभिर्हृयं ॥ सूर्यभाद्दिनभं यावत्हानिर्वृद्धि

हलक्रमात् ॥३१॥ इतिहलप्रवा ॥ पूर्वाषाढाभिर्तिहृद्रेविधियुग्मंहचित्र

यं ॥ उत्तराफाल्गुणीहस्तत्रयंमूलंचरेवती ॥३२॥ मैत्राश्विनीच लग्नेपि

सिंहकन्याघटोवृषः ॥ मिथुनोमकरोग्राह्योवास्तुकर्मणिशस्यते ॥३३॥ व ॥१२॥

त्र्याघातशूलानिव्यतिपातातिगंडकौ ॥ विष्कुंभः परिघोवर्ज्योवारेभौ

मश्चभास्करः ॥३५॥ इतिवास्तुकर्म ॥ आर्द्रामूलभिषाश्लेषाविन ॥ स्वाभ

रणीहृयं ॥ सामन्याचद्वादशीरिक्तापष्ठीचंद्रसयोष्टमी ॥३६॥ प्रतिपच्चेति

थ्योवारोसाम्योगानिकुमौतथा ॥ पूर्वदेवप्रतिष्ठास्यात्स्थिरलग्नोत्तरा

यणे ॥३७॥ इतिदेवालयवापीकूपतटाकादिप्रतिष्ठा ॥ विन ॥ स्वाभरणी

पूर्वादित्याश्लेषामघास्तथा ॥ अमावास्याचरिक्ताचवारेभौमरविस्तथा ॥

॥३८॥ ग्रहप्रवेशाचेत्रस्यपोषाषाढोचकार्तिकः ॥ अश्विनीचस्थिरेलग्नेग्रा

ह्योपक्षासुधैःस्मृतः ॥३९॥ इतिग्रहप्रवेशमुहूर्तः ॥ अनुराधात्रयंहस्तोमृ

गाश्वीचदितिहृयं ॥ यात्रायांरेवतीहस्तनिंद्यार्द्राभरणीहृयं ॥४०॥ मघापो

त्तराचित्रास्वातीसर्पाश्वान्येचमध्यमा ॥ षष्ठीरिक्ताद्वादशीचपर्वाणिपरि

वर्जयेत् ॥४१॥ लग्नेकुन्यामन्मथश्चमकरश्चतुलाधराः ॥ यात्रायांचंद्रबलेकार्यो

र्याशकुनेनविचारयेत् ॥४२॥ इतियात्रायां ॥ शनौचंद्रेत्यजेत्पूर्वांदक्षिणां

च दिशांगुरौ ॥ सूर्येशुक्रेपश्चिमांचबुधेभौमेतथोत्तरां ॥४३॥ सर्वदिग्गा

मनेहस्तपुष्यश्वाश्रवणमृगः ॥ सर्वसिद्धिकरापुष्याविद्यायांचगुरुस्त

था ॥४४॥ इतिप्रयाणेनसत्रावलि ॥ प्रतिपत्सुनवंम्यांचपूर्वस्यांदिशियो

गिनी ॥ अग्निकोणेतृतीयायामेकादश्यांचसासृता ॥४५॥ त्रयोदश्यां

चपंचम्यां दक्षिणस्यां शिवप्रिया ॥ द्वादश्यां च चतुर्थ्यां च नैरृते कोणगामि
नी ॥ ४६ ॥ चतुर्दश्यां च षष्ट्यां च पश्चिमायां च योगिनी ॥ पूर्णिमायां च सप्तम्यां
वायुकोणे च पार्वती ॥ ४७ ॥ दशम्यां च द्वितीयायां मुत्तरस्यां शिवा भवेत् ॥
ईशानकोणे चाष्टम्यां शैलराजसुता मता ॥ ४८ ॥ योगिनी सुखदा वामे पृ
ष्ठे वाञ्छितदायिनी ॥ दक्षिणे धननाशाय सन्मुखे मरणप्रदा ॥ ४९ ॥ इति
॥५३॥ योगिनीचक्रं ॥ मासे च प्रतिपच्छ्रेष्ठा द्वितीया कार्यकामिनी ॥ आरोग्यदा तृ ॥१३॥
तीया च चतुर्थी कलहप्रदा ॥ ५० ॥ पंचमी च श्रियं नित्यं षष्ठी च कलहप्रदा ॥
भक्ष्यपानसमायुक्ता सप्तमी सुखदा सदा ॥ ५१ ॥ अष्टमी व्याधिदा नित्यं नव
मी मरणं ध्रुवं ॥ दशमी भूमिलाभश्च एकादश्यापि हेमदा ॥ ५२ ॥ द्वादशी
प्राणसंदेहा सर्वसिद्धा त्रयोदशी ॥ शुक्लावाय दिवाहन्ना वर्जनीया चतु
र्दशी ॥ ५३ ॥ पूर्णिमा च अमावास्यां प्रस्थाने नैव कारयेत् ॥ तिथिक्षये च मा

शीघ्र बोध

सान्ते ग्रहणान्ते दिनत्रये ॥ ५४ ॥ इति यात्रातिथयः ॥ अष्टासु प्रहरार्द्धेषु प्रथ
माद्येषु दर्निशं ॥ पूर्वस्यां वामतो राहुस्तुर्यां तुर्यां दिशं व्रजेत् ॥ ५५ ॥ जयाय द
क्षिणे राहुर्योगिनी वामतः शुभा ॥ पृष्ठतो द्वयमाख्यातं चंद्रमा सन्मुखं शु
भः ॥ ५६ ॥ इति राहुज्ञानं ॥ चंद्रश्च मतिपूर्वादिक्रमेण दिक्चतुष्टये ॥ मेषा
दिके तु यात्रायां सन्मुखश्चैव केशोभनः ॥ ५७ ॥ इति चंद्रसन्मुखादिज्ञा ॥
याम सुग्मधुरात्रौ च वामपूर्वादिगो रविः ॥ यात्रास्मिन्दक्षिणे वामे प्रवेशे
श्रेष्ठको द्वय ॥ ५८ ॥ इति रविवारः ॥ सूर्यभाद्दशमे षष्ठे तूर्ये चांके त्रयोदशे ॥
विंशतिश्च रवेर्योगाः षट् कुयोगस्य वाशकाः ॥ ५९ ॥ इति वियोगः ॥ मानु १
भानु ७ दिक्षा ३ सर्प ८ ऋतु ६ वेदाश्च ४ निः क्रमात् ॥ रविवारान्मुहूर्तीयं कु
लिकानेद्दितः शुभः ॥ ६० ॥ इति मुहूर्तकुलिकानि ॥ गतानाड्या द्विगुणि
ता पंचनिश्च विभाजितां ॥ सूर्यशुक्रबुधश्चंद्रो मंदजीवकुजक्रमात् ॥ ६१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५॥ यावारस्यत्रद्दिवसेतदादिगणेक्कमात्॥ शुभग्रहस्यशुभदोमुहूर्त्तोन्यस्य ॥१५॥
दुःखदः॥ ६२॥ इतिमुहूर्त्तदेवता॥ तिथिवारंश्चनक्षत्रंनामाक्षरसमन्वितं॥
द्वित्रिचतुर्भिर्गुणितंरससप्ताष्टभाजितं॥ ६३॥ आदिशून्येभवेद्धानिःमध्य
शून्येद्विपुर्भयं॥ अंत्यशून्येभवेन्मृत्युः सर्वांकेविजइभवेत्॥ ६४॥ इतिस
र्वांकयोगः॥ ग्रामेप्रवाहेगमनादिग्रामंत्तस्यप्रवाहेनहिकिंचनापि॥ प्रष्टु
र्यदिस्याद्वहमानभागेदिक्कोचभागेविफलंसमस्तं॥ ६५॥ इतिरात्रायांव
रंभे॥ दक्षिणेदुःखदःशुक्रः सन्मुखंहंतिलोचनं॥ वामेपृष्ठशुभेनिःसरा
धयेस्तदगःशुभ॥ ६६॥ इतिशुक्रदोषमुहूर्त्तः॥ विद्यारंभेगुरुश्रेष्ठमध्यमौ
रविभार्गवौ॥ अन्यभ्यासेबुधेचंद्रेसाज्यमृत्युःशनौकुजे॥ ६७॥ इतिवि
द्यारंभः॥ पुष्यभाद्रपदायुग्मंस्वातीचश्रवणाश्विनी॥ हस्तोत्तरामृगौमै
त्रंतथाश्लेषाचरेवती॥ ६८॥ ग्रहाणितानिचैतानिक्रयविक्रयणेबुधैः॥

चंद्रभार्गवजीवाश्चवाराःशकुनमुत्तमं॥ ६९॥ इतिक्रयविक्रय॥ हस्तादि
पंचपूर्वाश्चधनिष्ठासुचकोनचं॥ रक्तंपरिदधेवस्त्रंभौमार्केगुरुभार्गव
॥ ७०॥ इतिरक्तवस्त्रचूडासुवर्णादिपरिधापनं॥ धनिष्ठापंचकेवर्जोत्रुण
काष्टादिसंग्रहः॥ त्रिज्यादक्षिणदिग्यात्राग्रहाणांछादनंतथा॥ ७१॥ तै
लाभ्यंगेरवौतापःसोमेशोभाकुजेमृतिः॥ बुधेधनंगुरौहानिःशुक्रेदुः
खंशनौसुखं॥ ७२॥ इतितैलाभ्यंग॥ हस्तत्रयेपत्रत्नयुगेमघायांपुष्येध
निष्ठाश्रवणोत्तरेषु॥ मूलानुराधाहरिरेवतिषुस्थिरेषुलग्नेषुवधूप्र
वेशः॥ ७३॥ सूर्येरोगःकुजेमृत्युःवैधव्यंचबुधेस्मरले॥ जीवशुक्राकि
चंद्रेषुप्रवेशःसंपदंवधूः॥ ७४॥ इतिवधूप्रवेशः॥ आश्लेषाद्वितयेस्वा
तिरोहिणीचपुनर्वसुः॥ रोगस्नानेरेवतीचवर्जयेदुत्तरात्रयं॥ ७५॥ रिक्ता
तिथोचरेलग्नेवारेचरविभौमजे॥ स्नानंचरोगिनःप्रोक्तंद्विजभोजनंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युतः ॥७६॥ इति रोगमुक्तस्नानं ॥ आनंदकालदंडश्च धूम्राक्षोथ प्रजापतिः ॥
सौम्यो ध्वांक्षो ध्वजश्चापि श्रीवत्सो वज्रमुद्गरौ ॥७७॥ छत्रं मित्रं मानसाख्यं
सिद्धिश्चाथ शुभामृतः ॥ उत्पातमृत्युकाणाश्च पद्माक्षो लुंबकं तथा ॥७८॥
मुषलो गजमातंगौ राक्षसश्च चरः स्थिरः ॥ वर्द्धमानश्च विज्ञेया अष्टाविंश
तिरियमी ॥७९॥ फलैस्त्वनामसदृशा योगा दैवज्ञभाषिताः ॥ अश्विनिरवि
॥१५॥ वारे च योगः स्यानंदसंज्ञकः ॥८०॥ मृगशीर्षे च शीतांशौ चाश्लेषा क्षितिनं ॥१५॥
दने ॥ बुधे हस्तानुराधा चेद्देवराजपुरोहिते ॥८१॥ भार्गवे चोत्तराषाढा मा
नौ शतभिषा यदा ॥ तदानंदादियोगस्यात्कालदंडादयः क्रमात् ॥८२॥ इ
ति नक्षत्रवारैरष्टाविंशतिरानंदादियोगाः ॥ हस्तः सूर्ये मृगः सोमवारे भौ
मे तथाश्विनी ॥ बुधे मैत्रो गुरौ पुष्यो रेवती भृगुनंदने ॥८३॥ रोहिणी सूर्य
पुत्रे च सर्वसिद्धिप्रदायकः ॥ असावमृतसिद्धिश्च योगः प्रोक्तः पुरातनैः ॥८४॥

ज्यौघ बोध

इति अमृतसिद्धियोगः ॥ विशाखादि चतुर्थे च सूर्यवारक्रमेण च ॥ उत्पात
मृत्युकाणाश्च सिद्धियोगाः प्रकीर्तिताः ॥८५॥ इति उत्पातयोगाः ॥ तिथ्यं
केन समायुक्तो वारांको यदि जायते ॥ त्रयोदशांकः ककचो योगो निंद्यः सदा
शुभे ॥८६॥ इति ककचयोगः ॥ नंदा सूर्यांगले च भद्रा भार्गवचंद्रयोः ॥ बु
धे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदाः ॥८७॥ इति मृत्युयोगः ॥ अंधाक्ष
श्चिपिटाक्षश्च काणाक्षो दिव्यलोचनः ॥ गणयेद्रोहिणी पूर्वं सप्तवारान्य
नुक्रमात् ॥८८॥ अंधके वा हृतं द्रव्यं लभते शीघ्रकेकरे ॥ काणाक्षः श्रणुया
न्नैति दिव्यनेत्रे न कांचनं ॥८९॥ इति अंधकाणचिपिटादिदोषाताज्ञानं ॥ पुन
र्वसुमृगश्चार्द्रा ज्येष्ठा मैत्रकरस्तथा ॥ पूर्वाषाढोत्तराषाढे मूलं दक्षिणचा
रिणः ॥९१॥ अश्विनी भरणी स्वाती विशाखा फाल्गुनीद्वयं ॥ मघा भाद्र
पदायुग्मं नव चोत्तरचारिणः ॥९२॥ कृत्तिका रोहिणी पुष्य चित्राश्लेषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरेवती॥ आंतं धनिष्ठा श्रवणेन वमध्य प्रवासिनः॥ ९३॥ इति नक्षत्रवारः॥
अमंति प्रदिष्ठो वत्सो मासानां च [illegible] त्रिकं त्रिकं॥ आदौ भाद्रपदं हत्वा सव्य
तो दिग्चतुष्टयं॥ ९४॥ यात्रा विवाद संबंधं द्वारं च गृह संमेयोः॥ भूपते
मिलनो पुष्टं वत्साणपि मुखं वर्जेत्॥ ९५॥ इति वत्सफलं॥ त्रयं पयमेश्च वा
ग्नाषद् विधो पंचमगेत्र पं॥ एकैमात्रा च नक्षत्रे चत्वारीं च पुनर्वसू॥ ९६॥
॥१६॥ पुष्य त्रिके रसः सर्पा मघा यां भानि पंच च॥ द्वयं द्वयं च फाल्गुण्यो स्त्रयं हस्ते ॥१६॥
पु पंच च॥ ९७॥ चित्रा स्वातौ रेकमेकं चतुष्कं च विशाखयोः॥ त्रयस्यादनुरा
धायां ज्येष्ठायां च त्रयस्मृतं॥ ९८॥ मूले रुद्रो चतुष्कं च पूर्वाषाढ तथोत्तरे
त्रयं चाभिजितः प्रोक्तं श्रवणे च त्रयं पलथा॥ ९९॥ धनिष्ठायां च चत्वारि
आंतं आतभिषा सह॥ द्वयं द्वयं भाद्रयोश्च द्वात्रिंशद पिवांतिकं॥ १००॥ इति
नक्षत्रतारासंज्ञा॥ लग्ने ष्टमे व्यये सूर्ये क्षेत्रपालस्य दूषणं॥ आकाशदेव्या

॥ग्र बो॰

चंद्रे तुलग्ने षष्ठाष्टमे व्यये॥ १॥ द्वादशो दशमे भौमे आकिन्या दूषणं स्मृतं॥
वनदेव्या भवेदोषः सप्तमे द्वादशे बुधे॥ २॥ यामित्रे द्वादशे जीवे तत्र दोषानि
गद्यते॥ अस्तव्यये देय पूज्ये जलदेव्याश्च दूषणं॥ ३॥ शनिश्चरे व्यये चास्त
दोषस्यादात्मवात्मजः॥ यामित्र द्वादशे राहुः कुगतिश्वात दूषणं॥ ४॥ पित्र
दोषो भवेन्मेषो स्वधा हानि विवर्णता॥ वृषे [illegible] गग [illegible] सदेव्याश्च ज्वरः
कुस्वप्न नेत्ररुक्॥ ५॥ मिथुने च महामायादोषो वलाज्वरो निलः॥ कर्कं चरा
किनी दोषो हास्य रोदन मौनसा॥ ६॥ सिंहे जलप्रेत दोषो दिवाशीलज्वरो रु
चिः॥ ग्रह दोषश्च कन्यायां क्रोधालस्या रुचि व्यथा॥ ७॥ क्षेत्रपाल भवेद्दो
षलुलेसं तानपीडनं॥ वृश्चिके नागदोषश्च ज्वालादेहबुवृद्धिता॥ ८॥ चाप
देहभवादोषो ज्वरश्वोकोदरव्यथा॥ मकरे चंद्रीका दोषादेहभंग ज्वरा
निलः॥ ९॥ मलिनः प्रेतदोषस्तु कुंभे देहस्य पीडनं॥ मीने च पाग्निनी दोषो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वरोणंजालदर्शने ॥१०॥ व्ययेधर्मेतृतीयेचषष्ठपापग्रहायदि हतोदेरज
कोत्रवतस्यदोषकुलोद्भवः ॥११॥ यानेजलेकुनेशाक्षेगरसूर्येस्वयंमृतः ॥
यादुश्चकुस्ततेनष्टः ॥ लिपूर्वेहिजावेने ॥१२॥ स्वक्षेत्रेगोत्रयोदोषः कुरुक्षेत्रे
पराङ्मुखः ॥ शत्रुक्षेत्रेशत्रुदोषोमित्रेस्वजनसंभवः ॥१३॥ इतिदोषज्ञानं ॥ अश्वा
दिसवाश्विनीहस्तामूलंपुष्योत्तरात्रयं ॥ सिद्धियोगधनिष्ठाचतिथिरप्यष्ट
॥१८॥ मतथा ॥१४॥ सूर्येविशाखाभरणीज्येष्ठमिश्रोमघातथा ॥ चतुर्दशीद्वाद ॥१८॥
शीचविरुद्धासप्तमीतिथिः ॥१५॥ सोमिपुष्यनुराधाचश्रवणोरोहिणीमृ
गःनवमीदशमीचापिसिद्धियोगाप्रकीर्तिताः ॥१६॥ चंद्रेचित्राविशाखाच
तथाषाढाद्वयंबुधे ॥ एकादशीतथाषष्ठीवर्जनीयात्रयोदशी ॥१७॥ भौ
मेमूलाश्विनीसर्पमृगश्चोत्तरभाद्रपात् ॥ सिद्धाष्टमीतृतीयाचसप्तमी
चत्रयोदशी ॥१८॥ निंद्यासतिभिषार्द्राचधनिष्ठापूर्वभाद्रपात् ॥ मघाचवै

शीघ्र बोध

॥१७॥

त्तराषाढाद्वितीयादशमीमकुजे ॥ बुधानुराधापुष्यश्चहस्तकृत्तिकारोहिणीमृगः ॥
सिद्धियोगाद्वादशीचद्वितीयासप्तमीषुच ॥२०॥ बुधेमूलंधनिष्ठाच ॥ रेव
तीचाश्विनीयमः ॥ तृतीयानवमीचापिवर्ज्याः प्रतिपदातिथिः ॥२१॥ गुरोपुष्यो
विशाखाचमैत्रपुष्यपुनर्वसुः ॥ सिद्धियोगपूर्णिमाचपूर्णिमादशमीति
थिः ॥२२॥ जीकेशतभिषार्द्राचहस्तकृत्तिकोत्तरफाल्गुनी ॥ विधिमृगाष्टमीषष्ठी
चतुर्थीश्चविवर्जिता ॥२३॥ शुक्रेचित्रार्यमापूषाश्रवणश्चैपुनर्वसुः ॥ सि
द्धिचैकादशीषष्ठीप्रतिपच्चत्रयोदशी ॥२४॥ भार्गवारोहिणीपुष्योज्येष्ठा
श्लेषामघातथा ॥ द्वितीयासप्तमीचापिवर्जनीयासदाबुधैः ॥२५॥ शनौ
चरोहिणीस्वातीश्रवणंपूर्वफाल्गुनी ॥ मघाचनवमीसिद्धाचतुर्थीश्च
चतुर्दशी ॥२६॥ शनौहस्तोत्तराषाढाचित्राचोत्तरफाल्गुनी ॥ रेवतीचवस
दावर्ज्यातिथिःषष्ठीचसप्तमी ॥२७॥ इतिनक्षत्रविचारःशुभाशुभयोगः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरंचलंस्मृतंस्वातीवनर्वसुश्रुतित्रयं॥ तीक्ष्णदारुणमाश्लेषाज्येष्ठार्द्रोमूल
मेवच॥२७॥ लघुक्षिप्रंस्मृतंपुष्योहस्तोश्विन्यभिजित्तथा॥ मृदुमैत्रंस्मृतं
चित्रानुराधारेवतीमृगः॥२८॥ ध्रुवंस्थिरंविनिर्दिष्टंरोहिणीचोत्तरात्रयं॥
क्रूरमुग्रंमघापूर्वात्रितयंभरणीतथा॥२९॥ मिश्रंसाधारणंप्रोक्तंविशा
खाकृत्तिकातथा॥ नक्षत्रेषुचकर्माणिनामतुल्यानिकारयेत्॥३०॥ इति
॥१८॥ संज्ञा॥ शनिचक्रंनराकारंलिखेत्पत्रेशनिर्भवेत्॥ तन्नक्षत्रंमुखेदत्वा ॥१८॥
यावन्नामनरस्यच॥३१॥ तावद्विचारयेत्तत्रज्ञेयंशुभमथाशुभं॥ एकंमु
खेचनक्षत्रंचत्वारोदक्षिणेकरे॥३२॥ त्रयंत्रयंपादयोश्चवामहस्तेचतु
ष्टयं॥ हृदिपंचत्रयामूर्ध्निनेत्रेगुह्येद्वयंद्वयं॥३३॥ हानिस्याद्दक्षिणेहस्ते
नामवामेचरोगता॥ हृदिश्रीमस्तकेराज्यंपादेपर्यटनंसदा॥३४॥ ने
त्रेसुखंगुदेमृत्युःशनिचक्रंविचारयेत्॥ द्विजपूजाचकर्तव्याकल्याणेजा

शीघ्र

बोध

यतेसदा॥३५॥ इतिशनिचक्रं॥ मेषराशौगुर्जरेषुप्रभासेचार्बुदेवृषे॥ मिथु
नेजायतेपीडास्थूलामूलस्थलेषुच॥३६॥ कर्केकाश्मीरकेचैवधारात्रेप्रस्थ
मृगाधिपे॥ शनीश्चरेचकन्यायांमालवायांतिसंक्षयं॥३७॥ तुलावृश्चिक
चापेषुयदियातिशनीश्चरे॥ नवर्षतितदामेघपृथ्वीदुर्भिक्षपीडिता॥३८॥
सुभिक्षंमकरेकुंभेजायतेबहुधान्यशनौ॥ मीनेचसर्वलोकानांदुर्भिक्षेणक्ष
याभवेत्॥३९॥ इतिराशौशनिविचारः॥ यत्रमासेरविर्वाराजायतेपंचसं
ततं॥ दुर्भिक्षंछत्रभंगंचतत्राकालेचमहाभयं॥४०॥ सोमश्चपंचवाराश्चय
त्रमासेभवंतिहि॥ धनधान्यसमृद्धिश्चसुखंभवतिसर्वदा॥४१॥ यत्रमासे
मंगलेचजायतेपंचवासराः॥ रक्तेनपूरितापृथ्वीछत्रभंगंतदाभवेत्॥
॥४२॥ बुधस्यपंचवारास्तुयत्रमासेनिरंतरं॥ प्रजानांसुखमत्यंतंसुभि
क्षंचप्रजायते॥४३॥ यत्रमासेपंचवाराजायतेचबृहस्पतेः॥ विग्रहोपंच

